# चतुर्थः अभ्यासः

# वाच्यम्

कर्तृवाच्यम् | कर्मवाच्यम् | भाववाच्यम्

## कर्तृवाच्यं कर्मवाच्यं च

♦ अधः प्रदत्तानि वाक्यानि ध्यानेन पठत अवगच्छत –

**( क )**

मोहनः कथयति

(i) अशोकः लेखं लिखति।



(ii) बालः जनकं प्रणमति।



(iii) अहं फलानि क्रीणामि।



(iv) अम्बा ओदनं पचति।



(v) छात्राः प्रार्थनां कुर्वन्ति।



(vi) महिलाः जलम् आनयन्ति।



**( ख )**

सोहनः कथयति

i) अशोकेन लेखः लिख्यते।

ii) बालेन जनकः प्रणम्यते।

iii) मया फलानि क्रीयन्ते।

iv) अम्बया ओदनं पच्यते।

v) छात्रैः प्रार्थना क्रियते।

vi) महिलाभिः जलम् आनीयते।

इत्थं वयं पश्यामः यत् लोकव्यवहारे एकम् एव कथनं सामान्यतः द्विप्रकारेण कथ्यते। **मोहनस्य कथनं कर्तृवाच्ये अस्ति सोहनस्य च कथनं कर्मवाच्ये अस्ति।** उभयोः कथनयोः कः भेदः अस्ति इति अत्र ज्ञास्यामः

| 'क' अन्तर्गतेषु वाक्येषु | 'ख' अन्तर्गतेषु वाक्येषु |
|---|---|
| कर्ता प्रथमाविभक्तौ अस्ति। | कर्ता तृतीयाविभक्तौ अस्ति। |
| कर्म द्वितीयाविभक्तौ अस्ति। | कर्म प्रथमाविभक्तौ अस्ति। |
| क्रिया च कर्तृपदानुरूपा अस्ति। | क्रिया च कर्मपदानुरूपा अस्ति। |

**अवधेयम् -**

| (क) कर्तृवाच्ये | (ख) कर्मवाच्ये |
|---|---|
| 1) कर्तरि प्रथमाविभक्तिः भवति। | 1) कर्तरि तृतीयाविभक्तिः भवति। |
| 2) कर्मणि द्वितीयाविभक्तिः भवति। | 2) कर्मणि प्रथमाविभक्तिः भवति। |
| 3) क्रियापदं कर्तृपदानुरूपं भवति अर्थात् कर्तृपदं यादृश-पुरुष-वचनयुक्तं भवति, क्रियापि तादृश-पुरुष-वचन युक्ता भवति। एवं कर्तृवाच्ये कर्तृपदं प्रधानं भवति। | 3) क्रिया च कर्मपदानुरूपा भवति अर्थात् कर्मपदे यः पुरुषः, यद् वचनं च भवति, क्रियायामपि तदेव पुरुषः वचनं च भवति। एवं कर्मवाच्ये कर्म प्रधानं भवति। |

**1. चित्रम् आधृत्य अधः एकः गद्यांशः दीयते। तस्मात् कर्तृवाच्यस्य वाक्यानि 'क' भागे, कर्मवाच्यस्य वाक्यानि च 'ख' भागे लिख्यन्ताम्।**



एकः पथिकः नगरं गच्छति। सः हस्तेन पुस्तकं गृह्णाति। तेन एकः स्यूतः अपि धार्यते। मार्गे आम्र-वृक्षाः दृश्यन्ते। तत्र सः खगानां कलरवं श्रृणोति। वृक्षच्छायायां तेन सुखम् अनुभूयते। सः आम्रफलानि खादति। तेन वृक्षाः प्रशंस्यन्ते। अहो! धन्याः एते वृक्षाः ये फलानि छायामपि च यच्छन्ति। एतैः तु सदा परोपकारः एव आचर्यते। पथिकेन सङ्कल्पः क्रियते - "अहमपि स्वगृहे वृक्षान् आरोपयिष्यामि।"

| 'क' (कर्तृवाच्यम्) | 'ख' (कर्मवाच्यम्) |
|---|---|
| **यथा** - एकः पथिकः नगरं गच्छति। | तेन एकः स्यूतः धार्यते । |
| क) ............................................... | क) ............................................... |
| ख) ............................................... | ख) ............................................... |
| ग) ............................................... | ग) ............................................... |
| घ) ............................................... | घ) ............................................... |
| ङ) ............................................... | ङ) ............................................... |

2. **अधोलिखितेषु वाक्येषु कर्तृवाच्य-वाक्यानि कर्मवाच्य-वाक्यानि च विचित्य पृथक्-पृथक् लिखन्तु –**

(क) उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः।

(ख) सर्पाः पवनं पिबन्ति ।

(ग) विद्वान् सर्वैः पूज्यते।

(घ) मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते।

(ङ) विद्या विनयं ददाति।

(च) बुभुक्षितैः व्याकरणं न भुज्यते, न पीयते काव्यरसः पिपासुभिः।

(छ) मत्तदन्तिनः रज्ज्वा बध्यन्ते।

(ज) बालकेन (जलेन) घटः पूर्यते।

| कर्तृवाच्ये | कर्मवाच्ये |
|---|---|
| **यथा** – उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः। | विद्वान् सर्वैः पूज्यते। |
| क) ................................................ | क) ................................................ |
| ख) ................................................ | ख) ................................................ |
| ग) ................................................ | ग) ................................................ |
| घ) ................................................ | घ) ................................................ |
| ङ) ................................................ | ङ) ................................................ |

3. **( अ ) अधोलिखितवाक्येषु कर्तृपदं कर्मवाच्ये परिवर्त्य लिख्यताम् –**

| **यथा** – भक्तः गीतां पठति। | भक्तेन गीता पठ्यते। |
|---|---|
| (क) शिष्याः गुरून् नमन्ति । | ........................ गुरवः नम्यन्ते। |
| (ख) पुत्रः जनकं सेवते । | ........................ जनकः सेव्यते। |
| (ग) अहं पत्रं लिखामि । | ........................ पत्रं लिख्यते। |
| (घ) त्वं कवितां शृणोषि। | ........................ कविता श्रूयते। |

**( आ ) अधोलिखितेषु वाक्येषु कर्मपदं परिवर्त्य रिक्तस्थानपूर्तिः क्रियताम् –**

| **यथा** – अहं **लोभं** त्यजामि। | मया **लोभः** त्यज्यते। |
|---|---|
| (क) आचार्याः छात्रान् उपदिशन्ति। | आचार्यैः ........................ उपदिश्यन्ते। |
| (ख) जनाः प्रदर्शनीं पश्यन्ति। | जनैः ........................ दृश्यते। |
| (ग) त्वं पुरस्कारं गृह्णासि। | त्वया ........................ गृह्यते। |
| (घ) छायाकारः छायाचित्रं रचयति। | छायाकारेण ........................ रच्यते। |

(इ) कर्मवाच्यस्य वाक्येषु क्रियापदानि लिखित्वा रिक्तस्थानानि पूरयत –

| | |
|---|---|
| **यथा** – मेघा: जलं वर्षन्ति। | मेघै: जलं वृष्यते। |
| (क) उपकारी मानं न अभिलषति। | उपकारिणा मान: न ........................ । |
| (ख) राष्ट्रपति: राष्ट्रं सम्बोधयति। | राष्ट्रपतिना राष्ट्रं ........................ । |
| (ग) छात्रा: शिक्षिकाम् अभिनन्दन्ति। | छात्राभि: / छात्रै: शिक्षिका ........................ । |
| (घ) प्रधानमन्त्री वैज्ञानिकान् सम्मानयति। | प्रधानमन्त्रिणा वैज्ञानिका: ........................ । |

4. सुधा एका स्वस्था कन्या अस्ति। तस्या: दिनचर्या नियमिता अस्ति। तस्या: दिनचर्यां ज्ञातुम् अध: मञ्जूषाया: क्रियापदानि विचित्य रिक्तस्थानानि पूर्यन्ताम्।

सुधया
- प्रत्यूषे उद्यानं गत्वा व्यायाम: ............................ ।
- प्रात: दुग्धं ............................ ।
- नित्यं दुग्धेन सह कदलीफले अपि ............................ ।
- भोजने सन्तुलिताहार: ............................ ।
- गृहवाटिकायां वृक्षा: ............................ ।
- स्ववस्त्राणि स्वयं ............................ ।
- नित्यं समये ............................ ।
- सायमपि ईश्वर: ............................ ।
- कदापि असत्यं न ............................ ।

| |
|---|
| क्षाल्यन्ते, आरोप्यन्ते, उद्यते, पीयते, गृह्यते, पठ्यते, खाद्येते, क्रियते, स्मर्यते। |

5. अधोलिखितवाक्यानि कर्मवाच्ये परिवर्त्यन्ताम् –

| | कर्तृवाच्ये | | कर्मवाच्ये |
|---|---|---|---|
| **यथा** – | मालाकार: वृक्षान् सिञ्चति। | ↔ | मालाकारेण वृक्षा: सिच्यन्ते। |
| (क) | आरक्षका: राष्ट्रं रक्षन्ति। | ↔ | |
| (ख) | एक: चन्द्र: तमो हन्ति। | ↔ | |
| (ग) | माता पुत्रं प्रतीक्षते। | ↔ | |
| (घ) | अहं पितरौ वन्दे। | ↔ | |

6.

## रिक्तस्थानेषु वाच्यपरिवर्तनं क्रियताम्

| कर्तृवाच्ये प्रयोगः | कर्मवाच्ये प्रयोगः |
|---|---|
| क्रोधः ज्ञानं नाशयति। | |
| | चन्द्रेण तमः हन्यते। |
| भूमिः अन्नं ददाति। | |
| छात्रः पाठम् अभ्यस्यति। | |
| | श्रमिकैः वेतनं लभ्यते। |
| अध्यापकाः शिष्यान् परीक्षन्ते। | |
| | मित्रेण सहयोगः दीयते। |
| लता राष्ट्रगीतं गायति। | |

## भाववाच्यम्

1. **अधोलिखितानि वाक्यानि ध्यानेन पठत –**

| 'क' (कर्तृवाच्यम्) | 'ख' (भाववाच्यम्) |
|---|---|
| (i) बालकः क्रीडति। | (i) बालकेन क्रीड्यते। |
| (ii) शिशुः स्वपिति। | (ii) शिशुना सुप्यते। |
| (iii) छात्राः तिष्ठन्ति। | (iii) छात्रैः स्थीयते। |
| (iv) कन्याः हसन्ति। | (iv) कन्याभिः हस्यते। |
| (v) अश्वाः धावन्ति । | (v) अश्वैः धाव्यते। |

- **उपरि प्रदत्तेषु वाक्येषु वयं पश्यामः यत्**

(1) कर्तृपदम् अस्ति।

(2) क्रियापदम् अपि अस्ति परन्तु कर्मपदं न अस्ति।

- **उपरि प्रदत्तेषु वाक्येषु केषां धातूनां प्रयोगः अस्ति?**

क्रीड्, स्वप्, स्था, हस्, धाव् इति एतेषां धातूनां प्रयोगः अस्ति। एते धातवः अकर्मकाः।

एतेन ज्ञायते यत् अत्र अकर्मकधातूनां प्रयोगः अस्ति अर्थात् अत्र कर्मपदं न अस्ति। अकर्मकधातुयोगे कर्तृवाच्यं भाववाच्यं च भवतः।

- **अधुना भाववाच्यस्य नियमान् जानीमः –**

(1) कर्तृपदे तृतीया भवति। कर्तृपदस्य विशेषणे अपि तृतीया भवति।
(2) भाववाच्ये अकर्मकधातूनाम् एव प्रयोगः भवति।
(3) भाववाच्ये क्रियापदं सदा प्रथमपुरुषस्य एकवचने एव प्रयुज्यते।
(4) भू, अस्, स्था, स्वप्, शीङ् हस्, क्रीड्–इत्यादयो धातवः अकर्मकाः।

**भाववाच्ये**

- कर्ता तृतीयाविभक्तौ भवति।
- कर्म न भवति।
- क्रिया प्रथमपुरुषस्य एकवचने एव भवति।

**2. समक्षं चित्रं दृष्ट्वा भाववाच्ये क्रियापदानि लिखन्तु –**

**उदाहरणम्**


बालकेन सुप्यते।  बालकः स्वपिति।

(i) कपोतैः ........................ ।  कपोताः उत्पतन्ति।

(ii) बालिकया ........................ ।  बालिका उपविशति।

(iii) भक्तैः गङ्गायां स्नायते ।  भक्ताः गङ्गायां स्नान्ति।

(iv) पुष्पैः ........................ ।  पुष्पाणि विकसन्ति।

(v) मयूरैः ........................ ।  मयूराः नृत्यन्ति।

3. **अधोलिखितेषु कानिचित् कर्मयुक्तानि ( सकर्मकाणि ) वाक्यानि, कानिचित् च कर्मरहितानि ( अकर्मकाणि ) सन्ति। कर्मयुक्तानि वाक्यानि 'क' भागे, कर्मरहितानि वाक्यानि च 'ख' भागे लिखत –**

(क) बालकेन ग्रन्थः पठ्यते।
(ख) सुधया फलानि खाद्यन्ते।
(ग) शिशुना हस्यते।
(घ) छात्रैः भ्रम्यते।
(ङ) अम्बया भोजनं पच्यते।
(च) मया नाटकं दृश्यते।
(छ) त्वया क्रीड्यते।
(ज) कृषकेण अजा नीयते।
(झ) सभासदैः स्थीयते।
(ञ) बालैः हस्यते।

| 'क' | 'ख' |
|---|---|
| क) ...................................... | क) ...................................... |
| ख) ...................................... | ख) ...................................... |
| ग) ...................................... | ग) ...................................... |
| घ) ...................................... | घ) ...................................... |
| ङ) ...................................... | ङ) ...................................... |

4. **उदाहरणम् अनुसृत्य अधोलिखितानि वाक्यानि भाववाच्ये परिवर्त्यन्ताम् –**

| कर्तृवाच्यम् | भाववाच्यम् |
|---|---|
| यथा – बालकाः हसन्ति। (हस्) | बालकैः हस्यते। |
| क) शिशुः रोदिति। (रुद्) | क) ...................................... |
| ख) छात्राः अत्र तिष्ठन्ति। (स्था) | ख) ...................................... |
| ग) सिंहः वने गर्जति। (गर्ज्) | ग) ...................................... |
| घ) अलसः दिने स्वपिति। (स्वप्) | घ) ...................................... |
| ङ) वानराः वृक्षेषु कूर्दन्ति। (कूर्द्) | ङ) ...................................... |
| च) लता वर्धते। (वृध्) | च) ...................................... |

5. **कोष्ठकात् उचितं पदं चित्वा रिक्तस्थानपूर्तिः क्रियताम् –**

**यथा** – कर्तृवाच्यम् – विद्याहीनाः न शोभन्ते।
भाववाच्यम् – विद्याहीनैः न शुभ्यते। (शुभ्यते / शोभ्यते)

(i) विमानम् उड्डयते।
विमानेन ........................। (उड्डीयते / उड्डयते)

(ii) सज्जना: उपविशन्ति।

सज्जनैः ………………… । (उपविश्यन्ते / उपविश्यते)

(iii) वृक्षा: कम्पन्ते।

वृक्षैः ………………… । (कम्प्यते / कम्प्यन्ते)।

(iv) विद्यार्थिन: धावन्ति।

विद्यार्थिभि: ………………… । (धाव्यते / धाव्यन्ते)

(v) स: आचार्य: भवति।

तेन आचार्येण ………………… । (भव्यते / भूयते)

**6. अत्र द्वयो: मित्रयो: संवाद: दत्त:। सञ्जय: प्रश्नान् करोति, रमा च उत्तराणि ददाति। उदाहरणम् अनुसृत्य रमाया: उत्तराणि कर्मवाच्ये लिख्यन्ताम् –**

**यथा –**

**सञ्जय:** – रमे! किं त्वं प्रात: चतुर्वादने उत्तिष्ठसि?

**रमा** – आम्। मया प्रात: चतुर्वादने उत्थीयते।

**सञ्जय:** – किं त्वं प्रात: उत्थाय भ्रमसि, क्रीडसि पठसि च?

**रमा** – आम्। ……………………………………………………………… ।

**सञ्जय:** – किं तव अग्रज: अभिनयं करोति?

**रमा** – नहि! ……………………………………………………………… ।

**सञ्जय:** – किं तव पितामह: वाटिकां सिञ्चति ?

**रमा** – आम्। ……………………………………………………………… ।

**सञ्जय:** – किं ते भगिनी चिकित्साशास्त्रं पठति ?

**रमा** – नहि। ……………………………………………………………… ।

**भाववाच्ये 'क्त' प्रत्ययस्य प्रयोग: —**

**7. कर्तृपदै: तृतीयां विभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत –**

**यथा** – (i) कन्यया चिरं सुप्तम्।

(ii) बालकेन रात्रौ जागरितम्।

(क) ………………… उच्चै: हसितम्। (जन)

(ख) ………………… वृक्षस्य अध: स्थितम्। (पथिक)

(ग) ………………… औद्योगिकक्षेत्रे विकसितम्। (भारत)

(घ) ………………… तत्र उपविष्टम्। (भवत्–पुंलिङ्गे)

(ङ) ………………… मयि विश्वसितम्। (तत्–पुंलिङ्गे)

**8. मञ्जूषायाः क्रियापदानि विचित्य रिक्तस्थानानि पूर्यन्ताम् –**

(i) तया सभायां न .................... ।

(ii) सिंहचित्रं दृष्ट्वा शिशुना .................... ।

(iii) तेन प्रातः पञ्चवादने .................... ।

(iv) अधुना तु मया .................... ।

(v) यात्रिभिः वृक्षच्छायायां .................... ।

**मञ्जूषा**

| |
|---|
| रुदितम्, उपविष्टम्, विस्मृतम्, उत्थितम्, हसितम्। |

## अस्माभिः अधीतम्

(1) वाच्यत्रयं भवति – कर्तृवाच्यम्, कर्मवाच्यम् भाववाच्यम् च।

(2) कर्तृवाच्ये क्रियायाः कर्त्रा सह सम्बन्धः भवति।
कर्मवाच्ये क्रियायाः कर्मणा सह सम्बन्धः भवति।

(3) भाववाच्ये कर्म न भवति।

(4) कर्तृवाच्ये (सकर्मकधातुयोगे) कर्तृपदं प्रथमाविभक्तौ, कर्मपदं द्वितीयाविभक्तौ क्रियापदं च कर्तृपदस्य पुरुष-वचनानुसारं भवति।

(5) कर्मवाच्ये तु कर्ता तृतीयाविभक्तौ, कर्म प्रथमाविभक्तौ क्रिया च कर्मपदम् अनुसरति।

(6) भाववाच्ये तु कर्तरि तृतीया विभक्तिः भवति क्रिया च सदा प्रथम-पुरुषस्य एकवचने एव भवति। कर्तृपदे बहुवचने सत्यपि क्रिया प्रथमपुरुषैकवचने एव प्रयुज्यते।

(7) कर्मवाच्यस्य भावाच्यस्य वा क्रियापदनिर्माणे मूलधातुना सह 'य' योज्यते।
यथा – मूलधातुः + य + ते (पठ्यते, लिख्यते, सेव्यते)। सर्वेषां धातूनां रूपाणि आत्मनेपदे एव भवन्ति।

**पाठान्तर्गत-धातूनां कर्मणि/भावे प्रयोगः**

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| कथ् | – | कथयति | कथ्यते | लिख् | – | लिखति | लिख्यते |
| प्र + नम् | – | प्रणमति | प्रणम्यते | क्री | – | क्रीणाति | क्रीयते |
| पच् | – | पचति | पच्यते | कृ | – | करोति | क्रियते |
| आ + नी | – | आनयति | आनीयते | दा | – | ददाति | दीयते |
| नी | – | नयति | नीयते | गम् | – | गच्छति | गम्यते |
| ग्रह् | – | गृह्णाति | गृह्यते | दृश् | – | पश्यति | दृश्यते |
| धृ | – | धारयति | धार्यते | श्रु | – | शृणोति | श्रूयते |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| अनु + भू | – | अनुभवति | अनुभूयते | खाद् | – | खादति | खाद्यते |
| प्र + शंस् | – | प्रशंसति | प्रशंस्यते | आ + चर् | – | आचरति | आचर्यते |
| आ + रूप् + णिच् | – | आरोपयति | आरोप्यते | सिध् | – | सिध्यति | सिध्यते |
| पूज् | – | पूजयति | पूज्यते | पा | – | पिबति | पीयते |
| वि + धा | – | विदधाति | विधीयते | भुज् | – | भुनक्ति | भुज्यते |
| बन्ध् | – | बध्नाति | बध्यते | पूर् / पॄञ् | – | पूरयति | पूर्यते |
| सेव् | – | सेवते | सेव्यते | उप + दिश् | – | उपदिशति | उपदिश्यते |
| रच् | – | रचयति | रच्यते | रुद् | – | रोदिति | रुद्यते |
| वृष् | – | वर्षति | वृष्यते | अभि + लष् | – | अभिलषति | अभिलष्यते |
| कम्प् | – | कम्पते | कम्प्यते | सम् + मन् + णिच् | – | सम्मानयति | सम्मान्यते |
| गर्ज् | – | गर्जति | गर्ज्यते | वृध् | – | वर्धते | वृध्यते |
| क्षाल् | – | क्षालयति | क्षाल्यते | स्मृ | – | स्मरति | स्मर्यते |
| उत् +डी | – | उड्डयते | उड्डीयते | षिच्–क्षरणे | – | सिञ्चति | सिच्यते |
| शुभ् | – | शोभते | शुभ्यते | रक्ष् | – | रक्षति | रक्ष्यते |
| धाव् | – | धावति | धाव्यते | हन् | – | हन्ति | हन्यते |
| प्रति + ईक्ष् | – | प्रतीक्षते | प्रतीक्ष्यते | भ्रम् | – | भ्रमति | भ्रम्यते |
| वन्द् | – | वन्दते | वन्द्यते | नश् + णिच् | – | नाशयति | नाश्यते |
| अभि + अस् | – | अभ्यस्यति | अभ्यस्यते | लभ् | – | लभते | लभ्यते |
| वि + श्वस् | – | विश्वसिति | विश्वस्यते | परि + ईक्ष् | – | परीक्षते | परीक्ष्यते |
| गै | – | गायति | गीयते | हृ | – | हरति | ह्रियते |
| स्वप् | – | स्वपिति | सुप्यते | क्रीड् | – | क्रीडति | क्रीड्यते |
| स्था | – | तिष्ठति | स्थीयते | हस् | – | हसति | हस्यते |
| अस् | – | अस्ति | भूयते | भू | – | भवति | भूयते |
| शीङ् | – | शेते | शीयते | उत् + पत् | – | उत्पतति | उत्पत्यते |
| उप + विश् | – | उपविशति | उपविश्यते | स्ना | – | स्नाति | स्नायते |
| वि + कस् | – | विकसति | विकस्यते | नृत् | – | नृत्यति | नृत्यते |


## मिश्रितप्रश्नाः

**अधोलिखितानां वाक्यानां वाच्यपरिवर्तनं कुरुत।**

1. नाहं स्वर्गं मोक्षं वा कामये। ........................................
2. अहं भवते चक्षुर्द्वयमेव प्रयच्छामि। ........................................
3. अस्माभिः नेपथ्ये काकध्वनिः श्रूयते। ........................................
4. केनापि कर्कशैः 'का का' शब्दैः वातावरणम् आकुलीक्रियते। ........................................
5. अहं प्रभाते सुप्तान् प्रबोधयामि। ........................................
6. मातरः शिशून् कथयन्ति। ........................................
7. त्वं कथं माम् अपि अधिक्षिपसि। ........................................
8. बकः क्रूरतया मीनान् भक्षयति। ........................................
9. मेषः अहर्निशं महानसं प्रविशति। ........................................
10. मेषः दाहवेदनया भूमौ लुठति। ........................................
11. अहं मन्दभाग्या कथं धैर्यं धारयामि। ........................................
12. भीमसेनः ततः निर्गच्छति। ........................................
13. सम्प्रति अहम् आश्वस्तः अस्मि। ........................................
14. नाहं त्वत्तः ब्रह्मास्त्रम् इच्छामि। ........................................
15. गगनात् सहस्रशः उल्काः भूमौ पतन्ति। ........................................
16. ब्रह्मास्त्रेण शैलाः विदीर्यन्ते। ........................................
17. तच्च मया संह्रियते। ........................................
18. पिता पुत्राय महत् विद्याधनं यच्छति। ........................................
19. छात्राणाम् एकः दलः तत्र प्रविशति। ........................................
20. बालसमूहः मधुरस्वरेण गायति। ........................................
21. विद्यालयस्य प्रधानाचार्यः तत्र आगच्छति। ........................................
22. मान्यः पर्यटनाधिकारी युष्मान् प्रतीक्षते। ........................................
23. वयम् अस्य विषये ज्ञातुम् उत्सुकाः स्मः। ........................................
24. भवद्भिः पर्यटनविभागेन प्रकाशिता सूची पठ्यते। ........................................
25. प्रत्येकम् अयनस्य अवधिः षण्मासात्मकः भवति। ........................................
26. यः हितानि न शृणोति सः बधिरः भवति। ........................................

# पञ्चमः अभ्यासः

# सङ्ख्या



मम विद्यालयः दिल्ली महानगरस्य **एकः** आदर्शः विद्यालयः अस्ति। अस्मिन् विद्यालये **एकं** प्रमुखं प्रवेशद्वारम् अस्ति। एतत् सिंहद्वारम् कथ्यते, **त्रीणि** च सहायकानि द्वाराणि सन्ति। **चत्वारि** द्वाराणि केवलं छात्राणां गमनागमनकाले एव अनावृतानि भवन्ति। अस्माकं विद्यालये **एकः** सुयोग्यः प्रधानाचार्यः **द्वौ** च तस्य सहायकौ उपप्रधानाचार्यौ स्तः। विविधविषयाणां **शताधिकाः** शिक्षकाः सन्ति। छात्राणां सङ्ख्या **द्विसहस्राधिका** विद्यते। अत्र **तिस्रः** विज्ञानप्रयोगशालाः **एका** च सङ्गणकप्रयोगशाला अस्ति। एवं समस्तानां प्रयोगशालानां सङ्ख्या **चतस्रः** अस्ति। भाषाणां कृते अपि **त्रयः** पृथक् विभागाः सन्ति। **त्रिषु** अपि विभागेषु अनुभविनः शिक्षकाः सन्ति। अयं विद्यालयः **द्वादशकक्षापर्यन्तः** अस्ति। कतिपयासु कक्षासु पञ्च कतिपयासु च **सप्त** अनुभागाः सन्ति। प्रति अनुभागं **पञ्चाशत्** छात्राः सन्ति। **एकादशी-द्वादशी** च कक्षा **त्रिषु** विभागेषु विभक्ता अस्ति। तत्र विज्ञान-विभागः वाणिज्य-विभागः कला-विभागः च। अस्मिन् विद्यालये **द्वे** क्रीडाक्षेत्रे स्तः। **एकं** वरिष्ठेभ्यः छात्रेभ्यः **द्वितीयं** च कनिष्ठेभ्यः वर्तते। विद्यालयस्य परिसरे **त्रीणि** उद्यानानि सन्ति। **एकस्मिन्** पाटलपुष्पाणां बाहुल्यं विद्यते। **द्वयोः** च अन्येषां कुसुमानाम्। प्रत्येकम् उद्यानेषु हरितदूर्वायाः हरीतिमा जनानां मनांसि हरति। कार्यालये **त्रयः** लिपिकाः एकश्च कार्यालयस्य अधीक्षकः अस्ति। अधीक्षकेण सर्वकार्यं **त्रिषु** लिपिकेषु विभक्तं कृतम्। कार्यालयस्य **चत्वारः** लिपिकाः परस्परं सहयोगेन कार्यं कुर्वन्ति। अत एव अयं विद्यालयः अहर्निशम् उन्नतिपथं गच्छति।

**(क) उपरिप्रदत्त-अनुच्छेदात् स्थूलाक्षरैः मुद्रितानि सङ्ख्यावाचकानि पदानि चित्वा लिङ्गानुसारं पृथक्-पृथक् तालिकासु लिखत -**

| पुंलिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|
| ........................... | ........................... | ........................... |
| ........................... | ........................... | ........................... |
| ........................... | ........................... | ........................... |
| ........................... | ........................... | ........................... |
| ........................... | ........................... | ........................... |
| ........................... | ........................... | ........................... |
| ........................... | ........................... | ........................... |
| ........................... | ........................... | ........................... |

**नियमाः**

- सङ्ख्यावाचकाः शब्दाः विशेषणानि भवन्ति।
- सङ्ख्याशब्देषु एकतः प्रारभ्य चतुर्-सङ्ख्या-वाचकशब्दानां रूपाणि त्रिषु लिङ्गेषु पृथक्-पृथक् चलन्ति परन्तु पञ्चतः आरभ्य सर्वेषां सङ्ख्या-वाचकशब्दानां रूपाणि त्रिषु लिङ्गेषु समानरूपेण चलन्ति।
- **यथा** – एकशब्दस्य रूपाणि (पुं० एकः, स्त्री-एका, नपुं०-एकम्) एकवचने भवन्ति। द्विशब्दस्य रूपाणि (द्वौ / द्वे / द्वे) द्विवचने भवन्ति। त्रिशब्दस्य रूपाणि (त्रयः / तिस्रः / त्रीणि) बहुवचने भवन्ति। पञ्चन्-आदिशब्दानां त्रिषु लिङ्गेषु रूपाणि समानानि एव भवन्ति।

**(ख) प्रदत्तम् अनुच्छेदम् आश्रित्य अधोलिखितवाक्येषु रिक्तस्थानानां पूर्तिम् उचितसङ्ख्यापदैः कुरुत –**

1. मम विद्यालयः .................. आदर्शः विद्यालयः अस्ति।
2. अस्मिन् विद्यालये .................. प्रमुखं प्रवेशद्वारम् अस्ति।
3. .................. सहायकानि द्वाराणि सन्ति।
4. .................. द्वाराणि केवलं छात्राणां गमनागमनकाले एव अनावृतानि भवन्ति।
5. अत्र .................. विज्ञानप्रयोगशालाः सन्ति।
6. विद्यालये .................. सङ्गणकप्रयोगशाला अस्ति।
7. भाषाणाम् अपि .................. विभागाः सन्ति।
8. कतिपयासु कक्षासु .................. अनुभागाः, कतिपयासु च .................. अनुभागाः सन्ति।
9. समस्तप्रयोगशालानां सङ्ख्या .................. अस्ति।
10. प्रधानाचार्यस्य .................. सहायकौ उपप्रधानाचार्यौ स्तः।

**(ग) वार्तालापः**

**हर्षवर्द्धनः** – अहो कीदृशं रमणीयम् उद्यानम्?

**यशोवर्द्धनः** – बाढम्, अतिशोभनम्।

**हर्षवर्द्धनः** – अत्र तु आम्रवृक्षाः अपि सन्ति। अहं तान् गणितवान्। अस्मिन् उपवने विंशतिः आम्रवृक्षाः सन्ति। किं त्वया गणिताः?

**यशोवर्द्धनः** – मया आम्रवृक्षाः नैव गणिताः परन्तु निम्बवृक्षाणां गणना कृता। तेषां सङ्ख्या पञ्चविंशतिः अस्ति।

**हर्षवर्द्धनः** – त्वम् उद्यानं परितः परिभ्रम्य मह्यं निवेदय, अत्र कति अशोकवृक्षाः सन्ति?

**यशोवर्द्धनः** – श्रीमन्! अत्र पञ्चाशत् अशोकवृक्षाः सन्ति।

**हर्षवर्द्धनः** – अहो एषः सुगन्धः कुतः आयाति?

**यशोवर्द्धनः** – सुगन्धस्तु मयापि अनुभूयते।

**हर्षवर्द्धनः** – पश्य, उद्यानस्य पूर्वभागे एका पुष्पवाटिका विद्यते, ततः एव समायाति सुगन्धः।

**यशोवर्द्धनः** – तत्र चलित्वा पश्यावः। अत्र तु शताधिकाः पाटलपादपाः सन्ति। अहं पाटलपुष्पाणि गणयामि। अस्यां

वाटिकायां चत्वारिंशत् विकसितानि, पञ्चत्रिंशत् च अर्द्धविकसितानि कुसुमानि सन्ति।

**हर्षवर्द्धनः** – मित्र! यावत् त्वया पाटलपुष्पाणि गणितानि तावत् मया जपाकुसुमानि गणितानि। अत्र चतुःपञ्चाशत् जपाकुसुमानि वर्तन्ते, येषां सुगन्धः सर्वत्र प्रसरति, वातावरणं सुरभितं सुरम्यं च करोति।

**(घ) उपरिप्रदत्तवार्तालापात् सङ्ख्यावाचकानि पदानि चित्वा लिखत –**

**यथा** – विशंतिः

1. ..................................
2. ..................................
3. ..................................
4. ..................................
5. ..................................
6. ..................................
7. ..................................

### नियमनिर्धारणम्

**एकोनविंशतिः सङ्ख्यातः प्रारभ्य नव-नवतिः पर्यन्ताः सङ्ख्यावाचकशब्दाः एकवचनान्ताः नित्यस्त्रीलिङ्गाः च भवन्ति। एतेषां रूपाणि 'मति' शब्दवत् भवन्ति। त्रिंशत्, चत्वारिंशत्, पञ्चाशत् शब्दानां रूपाणि 'सरित्' शब्दवत् भवन्ति। षष्टिः, सप्ततिः, अशीतिः, नवतिः, एतेषां शब्दानां रूपाणि 'विंशतिवत्' भवन्ति।**

**(ङ) उपरि-प्रदत्तं वार्तालापम् आधृत्य अङ्कान् दृष्ट्वा रिक्तस्थानानि सङ्ख्यावाचकैः पदैः पूरयत –**

1. अस्मिन् उपवने (20) .................... आम्रवृक्षाः सन्ति।
2. उद्याने (50) .................... अशोकवृक्षाः सन्ति।
3. वाटिकायां (40) .................... विकसितानि च अर्द्धविकसितानि कुसुमानि सन्ति।
4. वाटिकायां (54) .................... गन्धकुसुमानि सन्ति।
5. उद्याने (25) .................... निम्बवृक्षाः सन्ति।